# नलोपाख्यानम्

## 13

बृहदश्व उवाच।

सा तच्छ्रुत्वानवद्याङ्गी सार्थवाहवचस्तदा।

अगच्छत्तेन वै सार्धं भर्तृदर्शनलालसा॥ ३-६२-१ ॥

अथ काले बहुतिथे वने महति दारुणे।

तडागं सर्वतोभद्रं पद्मसौगन्धिकं महत्॥ ३-६२-२ ॥

ददृशुर्वणिजो रम्यं प्रभूतयवसेन्धनम्।

बहुमूलफलोपेतं नानापक्षिगणैर्वृतम्॥ ३-६२-३ ॥

तं दृष्ट्वा मृष्टसलिलं मनोहरसुखावहम्।

सुपरिश्रान्तवाहास्ते निवेशाय मनो दधुः॥ ३-६२-४॥

संमते सार्थवाहस्य विविशुर्वनमुत्तमम्।

उवास सार्थः सुमहान्वेलामासाद्य पश्चिमाम्॥ ३-६२-५॥

अथार्धरात्रसमये निःशब्दस्तिमिते तदा।

सुप्ते सार्थे परिश्रान्ते हस्तियूथमुपागमत्।

पानीयार्थं गिरिनदीं मदप्रस्रवणाविलाम्॥ ३-६२-६ ॥

मार्गं संरुध्य संसुप्तं पद्मिन्याः सार्थमुत्तमम्।

सुप्तं ममर्द सहसा चेष्टमानं महीतले॥ ३-६२-७॥

हाहारवं प्रमुञ्चन्तः सार्थिकाः शरणार्थिनः।

वनगुल्मांश्च धावन्तो निद्रान्धा महतो भयात्।

केचिद्दन्तैः करैः केचित्केचित्पद्भ्यां हता नराः॥ ३-६२-८॥

गोखरोष्ट्राश्वबहुलं पदातिजनसंकुलम्।

भयार्तं धावमानं तत्परस्परहतं तदा॥ ३-६२-९॥

घोरान्नादान्विमुञ्चन्तो निपेतुर्धरणीतले।

वृक्षेष्वासज्य संभग्नाः पतिता विषमेषु च।

तथा तन्निहतं सर्वं समृद्धं सार्थमण्डलम्॥ ३-६२-१०॥

अथापरेद्युः संप्राप्ते हतशिष्टा जनास्तदा।

वनगुल्माद्विनिष्क्रम्य शोचन्तो वैशसं कृतम्।

भ्रातरं पितरं पुत्रं सखायं च जनाधिप॥ ३-६२-११॥

अशोचत्तत्र वैदर्भी किं नु मे दुष्कृतं कृतम्।

यो ऽपि मे निर्जने ऽरण्ये संप्राप्तो ऽयं जनार्णवः।

हतो ऽयं हस्तियूथेन मन्दभाग्यान्ममैव तु॥ ३-६२-१२॥

प्राप्तव्यं सुचिरं दुःखं मया नूनमसंशयम्।

नाप्राप्तकालो म्रियते श्रुतं वृद्धानुशासनम्॥ ३-६२-१३॥

यन्नाहमद्य मृदिता हस्तियूथेन दुःखिता।

न ह्यदैवकृतं किं चिन्नराणामिह विद्यते॥ ३-६२-१४॥

न च मे बालभावे ऽपि किंचिद्व्यपकृतं कृतम्।

कर्मणा मनसा वाचा यदिदं दुःखमागतम्॥ ३-६२-१५॥

मन्ये स्वयंवरकृते लोकपालाः समागताः।

प्रत्याख्याता मया तत्र नलस्यार्थाय देवताः।

नूनं तेषां प्रभावेन वियोगं प्राप्तवत्यहम्॥ ३-६२-१६॥

एवमादीनि दुःखानि सा विलप्य वराङ्गना।

हतशिष्टैः सह तदा ब्राह्मणेर्वेदपारगैः।

अगच्छद्राजशार्दूल दुःखशोकपरायणा॥ ३-६२-१७॥

गच्छन्ती सा चिरात्कालात्पुरमासादयन्महत्।

सायाह्ने चेदिराजस्य सुबाहोः सत्यवादिनः।

वस्त्रार्धकर्तसंवीता प्रविवेश पुरोत्तमम्॥ ३-६२-१८॥

तां विवर्णां कृशां दीनां मुक्तकेशीममार्जनाम्।

उन्मत्तामिव गच्छन्तीं ददृशुः पुरवासिनः॥ ३-६२-१९॥

प्रविशन्तीं तु तां दृष्ट्वा चेदिराजपुरीं तदा।

अनुजग्मुस्ततो बाला ग्रामिपुत्राः कुतूहलात्॥ ३-६२-२०॥

सा तैः परिवृतागच्छत्समीपं राजवेश्मनः।

तां प्रासादगतापश्यद्राजमाता जनैर्वृताम्॥ ३-६२-२१॥

सा जनं वारयित्वा तं प्रासादतलमुत्तमम्।

आरोप्य विस्मिता राजन्दमयन्तीमपृच्छत॥ ३-६२-२२॥

एवमप्यसुखाविष्टा बिभर्षि परमं वपुः।

भासि विद्युदिवाभ्रेषु शंस मे कासि कस्य वा॥ ३-६२-२३॥

न हि ते मानुषं रूपं भूषणेरपि वर्जितम्।

असहाया नरेभ्यश्च नोद्विजस्यमरप्रभे॥ ३-६२-२४॥

तच्छ्रुत्वा वचनं तस्या भैमी वचनमब्रवीत्।

मानुषीं मां विजानीहि भर्तारं समनुव्रताम्॥ ३-६२-२५॥

सैरन्ध्रीं जातिसंपन्नां भुजिष्यां कामवासिनीम्।

फलमूलाशनामेकां यत्रसायंप्रतिश्रयाम्॥ ३-६२-२६॥

असंख्येयगुणो भर्ता मां च नित्यमनुव्रतः।

भर्तारमपि तं वीरं छायेवानपगा सदा॥ ३-६२-२७॥

तस्य दैवात्प्रसङ्गो ऽभूदतिमात्रं स्म देवने।

द्यूते स निर्जितश्चैव वनमेको ऽभ्युपेयिवान्॥ ३-६२-२८॥

तमेकवसनं वीरमुन्मत्तमिव विह्वलम्।

आश्वासयन्ती भर्तारमहमन्वगमं वनम्॥ ३-६२-२९॥

स कदाचिद्वने वीरः कस्मिंश्चित्कारणान्तरे।

क्षुत्परीतः सुविमनास्तदप्येकं व्यसर्जयत्॥ ३-६२-३०॥

तमेकवसनं नग्नमुन्मत्तं गतचेतसम्।

अनुव्रजन्ती बहुला न स्वपामि निशाः सदा॥ ३-६२-३१॥

ततो बहुतिथे काले सुप्तामुत्सृज्य मां क्वचित्।

वाससो ऽर्धं परिच्छिद्य त्यक्तवान्मामनागसम्॥ ३-६२-३२॥

तं मार्गमाणा भर्तारं दह्यमाना दिनक्षपाः।

न विन्दाम्यमरप्रख्यं प्रियं प्राणधनेश्वरम्॥ ३-६२-३३॥

तामश्रुपरिपूर्णाक्षीं विलपन्तीं तथा बहु।

राजमाताब्रवीदार्तां भैमीमार्ततरा स्वयम्॥ ३-६२-३४॥

वसस्व मयि कल्याणि प्रीतिर्मे त्वयि वर्तते।

मृगयिष्यन्ति ते भद्रे भर्तारं पुरुषा मम॥ ३-६२-३५॥

अथ वा स्वयमागच्छेत्परिधावन्नितस्ततः।

इहैव वसती भद्रे भर्तारमुपलप्स्यसे॥ ३-६२-३६॥

राजमातुर्वचः श्रुत्वा दमयन्ती वचो ऽब्रवीत्।

समयेनोत्सहे वस्तुं त्वयि वीरप्रजायिनि॥ ३-६२-३७॥

उच्छिष्टं नैव भुञ्जीयां न कुर्यां पादधावनम्।

न चाहं पुरुषानन्यान्संभाषेयं कथंचन॥ ३-६२-३८॥

प्रार्थयेद्यदि मां कश्चिद्दण्ड्यस्ते स पुमान्भवेत्।

भर्तुरन्वेषणार्थं तु पश्येयं ब्राह्मणानहम्॥ ३-६२-३९॥

यद्येवमिह कर्तव्यं वसाम्यहमसंशयम्।

अतो ऽन्यथा न मे वासो वर्तते हृदये क्वचित्॥ ३-६२-४०॥

तां प्रहृष्टेन मनसा राजमातेदमब्रवीत्।

सर्वमेतत्करिष्यामि दिष्ट्या ते व्रतमीदृशम्॥ ३-६२-४१॥

एवमुक्त्वा ततो भैमीं राजमाता विशां पते।

उवाचेदं दुहितरं सुनन्दां नाम भारत॥ ३-६२-४२॥

सैरन्ध्रीमभिजानीष्व सुनन्दे देवरूपिणीम्।

एतया सह मोदस्व निरुद्विग्नमनाः स्वयम्॥ ३-६२-४३॥